# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (चतुर्थ अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ चतुर्थोऽध्यायः ॥

। ध्यानम् ।

ॐ कालाभ्राभां(ङ्) कटाक्षैररिकुलभयदां(म्) मौलिबद्धेन्दुरेखां(म्),
शङ्खं(ञ्) चक्रं(ङ्) कृपाणं(न्) त्रिशिखमपि करैरुद्वहन्तीं(न्) त्रिनेत्राम्।
सिं(म्)हस्कन्धाधिरूढां(न्) त्रिभुवनमखिलं(न्) तेजसा पूरयन्तीं(न्)
ध्यायेद्दुर्गां(ञ्) जयाख्यां(न्) त्रिदशपरिवृतां(म्) सेवितां(म्) सिद्धिकामैः ॥

ॐ ऋषिरुवाच ॥ 1॥

शक्रादयः(स्) सुरगणा निहतेऽतिवीर्ये,
तस्मिन्दुरात्मनि सुरारिबले च देव्या ।
तां(न्) तुष्टुवुः(फ्) प्रणतिनम्रशिरोधरां(म्)सा,
वाग्भिः(फ्) प्रहर्षपुलकोद्गमचारुदेहाः ॥ 2॥

देव्या यया ततमिदं(ञ्) जगदात्मशक्त्या,

निः(श्)शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां(म्),
भक्त्या नताः(स्) स्म विदधातु शुभानि सा नः ॥ 3॥

यस्याः(फ्) प्रभावमतुलं(म्) भगवाननन्तो,
ब्रह्मा हरश्च न हि वक्तुमलं(म्) बलं(ञ्) च ।
सा चण्डिकाखिलजगत्परिपालनाय,
नाशाय चाशुभभयस्य मतिं(ङ्) करोतु ॥ 4॥

या श्रीः(स्)स्वयं(म्) सुकृतिनां(म्) भवनेष्वलक्ष्मीः(फ्),
पापात्मनां(ङ्) कृतधियां(म्) हृदयेषु बुद्धिः ।
श्रद्धा सतां(ङ्) कुलजनप्रभवस्य लज्जा,
तां(न्) त्वां(न्) नताः(स्) स्म परिपालय देवि विश्वम् ॥ 5॥

किं(वँ) वर्णयाम तव रूपमचिन्त्यमेतत्,
किञ्चातिवीर्यमसुरक्षयकारि भूरि ।
किं(ञ्) चाहवेषु चरितानि तवाति यानि,
सर्वेषु देव्यसुरदेवगणादिकेषु ॥ 6॥

हेतुः(स्) समस्तजगतां(न्) त्रिगुणापि दोषैर्-
न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं(ञ्) जगदं(म्)शभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ 7॥

यस्याः(स्) समस्तसुरता समुदीरणेन,
तृप्तिं(म्) प्रयाति सकलेषु मखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः(स्) स्वधा च ॥ 8॥

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वं(म्),
अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्,
विद्यासि सा भगवती परमा हि देवि ॥ 9॥

शब्दात्मिका सुविमलर्ग्यजुषां(न्) निधान-
मुद्गीथरम्यपदपाठवतां(ञ्) च साम्नाम् ।
देवि त्रयी भगवती भवभावनाय
वार्तासि सर्वजगतां(म्) परमार्तिहन्त्री ॥ 10॥

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः(ख्) कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ 11॥

ईषत्सहासममलं(म्) परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।
अत्यद्भुतं(म्) प्रहृतमात्तरुषा तथापि,
वक्त्रं(वँ) विलोक्य सहसा महिषासुरेण ॥ 12॥

दृष्ट्वा तु देवि कुपितं(म्) भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान् मुमोच महिषस्तदतीव चित्रं(ङ्)
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ 13॥

देवि प्रसीद परमा भवती भवाय,
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेतन्,
नीतं(म्) बलं(म्) सुविपुलं(म्) महिषासुरस्य ॥ 14॥

ते सम्मता जनपदेषु धनानि तेषां(न्),
तेषां(यँ) यशां(म्)सि न च सीदति बन्धुवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा,
येषां(म्) सदाभ्युदयदा भवती प्रसन्ना ॥ 15॥

धर्म्याणि देवि सकलानि सदैव कर्माण्-
यत्यादृतः(फ्) प्रतिदिनं(म्) सुकृती करोति ।
स्वर्गं(म्) प्रयाति च ततो भवती प्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥ 16॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः(स्),
स्वस्थैः(स्) स्मृता मतिमतीव शुभां(न्) ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या,
सर्वोपकारकरणाय सदार्द्रचित्ता ॥ 17॥

एभिर्हतैर्जगदुपैति सुखं(न्) तथैते,
कुर्वन्तु नाम नरकाय चिराय पापम् ।
सङ्ग्राममृत्युमधिगम्य दिवं(म्) प्रयान्तु,
मत्वेति नूनमहितान् विनिहं(म्)सि देवि ॥ 18॥

दृष्ट्वैव किं(न्) न भवती प्रकरोति भस्म,
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता,
इत्थं(म्) मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥ 19॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः(श्),
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमं(म्)शुमदिन्दुखण्ड-
योग्याननं(न्) तव विलोकयतां(न्) तदेतत् ॥ 20॥

दुर्वृत्तवृत्तशमनं(न्) तव देवि शीलं(म्),
रूपं(न्) तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं(ञ्) च हन्तृ हृतदेवपराक्रमाणां(वँ),
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ 21॥

केनोपमा भवतु तेऽस्य पराक्रमस्य,
रूपं(ञ्) च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा,
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ 22॥

त्रैलोक्यमेतदखिलं(म्) रिपुनाशनेन,
त्रातं(न्) त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं(म्) रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं(न्) नमस्ते ॥ 23॥

शूलेन पाहि नो देवि, पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः(फ्) पाहि, चापज्यानिःस्वनेन च ॥ 24॥

प्राच्यां(म्) रक्ष प्रतीच्यां(ञ्) च, चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य, उत्तरस्यां(न्) तथेश्वरि ॥ 25॥

सौम्यानि यानि रूपाणि, त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि, तै रक्षास्मां(म्)स्तथा भुवम् ॥ 26॥

खड्गशूलगदादीनि, यानि चास्त्रानि तेऽम्बिके ।
करपल्लवसङ्गीनि, तैरस्मान् रक्ष सर्वतः ॥ 27॥

ऋषिरुवाच ॥ 28॥

एवं(म्) स्तुता सुरैर्दिव्यैः(ख्), कुसुमैर्नन्दनोद्भवैः ।
अर्चिता जगतां(न्) धात्री, तथा गन्धानुलेपनैः ॥ 29॥

भक्त्या समस्तैस्त्रिदशैर्- दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी, समस्तान् प्रणतान् सुरान् ॥ 30॥

देव्युवाच ॥ 31॥

व्रियतां(न्) त्रिदशाः(स्) सर्वे, यदस्मत्तोऽभिवाञ्छितम् ॥ 32॥

देवा ऊचुः ॥ 33॥

भगवत्या कृतं(म्) सर्वं(न्), न किञ्चिदवशिष्यते ॥ 34॥

यदयं(न्) निहतः(श्) शत्रु- रस्माकं(म्) महिषासुरः ।
यदि चापि वरो देयस्- त्वयास्माकं(म्) महेश्वरि ॥ 35॥

सं(म्)स्मृता सं(म्)स्मृता त्वं(न्) नो, हिं(म्)सेथाः(फ्) परमापदः ।
यश्च मर्त्यः(स्) स्तवैरेभिस्- त्वां(म्) स्तोष्यत्यमलानने ॥ 36॥

तस्य वित्तर्द्धिविभवैर् - धनदारादिसम्पदाम् ।
वृद्धयेऽस्मत्प्रसन्ना त्वं(म्), भवेथाः(स्) सर्वदाम्बिके ॥ 37॥

ऋषिरुवाच ॥ 38॥

इति प्रसादिता देवैर्- जगतोऽर्थे तथात्मनः ।
तथेत्युक्त्वा भद्रकाली, बभूवान्तर्हिता नृप ॥ 39॥

इत्येतत्कथितं(म्) भूप, सम्भूता सा यथा पुरा ।
देवी देवशरीरेभ्यो, जगत्त्रयहितैषिणी ॥ 40॥

पुनश्च गौरीदेहात्सा, समुद्भूता यथाभवत् ।
वधाय दुष्टदैत्यानां(न्), तथा शुम्भनिशुम्भयोः ॥ 41॥

रक्षणाय च लोकानां(न्), देवानामुपकारिणी ।
तच्छृणुष्व मयाऽऽख्यातं(यँ), यथावत्कथयामि ते ॥ 42॥
। ह्रीं ॐ ।

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ॥

उवाच 5, अर्धश्लोकौ 2, श्लोकाः 35, एवमादितः ॥ 259॥

